This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम
शिवः
१

श्रीगणेशाय नमः॥ प्रणम्य जगदुत्पत्तिः स्थिति संहारकारणम्॥ स्वर्गापवर्गयोर्द्वारं त्रैलोक्यशरणं शिवम्॥१॥ नानामुनीनां
वचनैरिदानीं समासतः सद्भिषजां नियोगात्। सोपद्रवारिष्टनिदानलिङ्गो निबध्यते रोगविनिश्चयोऽयम्॥२॥ नानातन्त्रविहीनानां भिष
जामल्पमेधसाम्। सुखं विज्ञातुमातङ्कमयमेव भविष्यति॥३॥ निदानं पूर्वरूपाणि रूपाण्युपशयस्तथा॥ संप्राप्तिश्चेति विज्ञानं रोगाणां
पंचधा स्मृतम्। निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः॥ निदानमाहुः पर्यायैः प्राग्रूपं येन लक्ष्यते। उत्पित्सुरामयो दोषविशेषेणा
नधिष्ठितः॥ लिङ्गमव्यक्तमल्पत्वाद्व्याधीनां तद्यथायथम्। तदेव व्यक्ततां यातं रूपमित्यभिधीयते। संस्थानं व्यंजनं लिंगं ल
क्षणं चिह्नमाकृतिः। हेतुव्याधिविपर्यस्तविपर्यस्तार्थकारिणाम्। औषधान्नविहाराणामुपयोगं सुखावहम्। विद्यादुपशयं व्याधेः
स हि सात्म्यमिति स्मृतः। विपरीतोऽनुपशयो व्याध्यसात्म्याभिसंज्ञितः। यथादुष्टेन दोषेण यथा चानुविसर्पता। निर्वृत्तिरामयस्या
सौ संप्राप्तिर्जातिरागतिः। संख्याविकल्पप्राधान्यबलकालविशेषतः। सा भिद्यते यथात्रैव वक्ष्यन्तेऽष्टौ ज्वरा इति। दोषाणां समवेता
नां विकल्पोंऽशांशकल्पना। स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादिशेत्। हेत्वादिकार्त्स्न्यावयवैर्बलाबलविशेषणम्। न
क्तंदिनर्तुभुक्तांशैर्व्याधिकालो यथामलम्। इति प्रोक्तो निदानार्थस्तं व्यासेनोपदिश्यते। सर्वेषामेव रोगाणां निदानं कुपिता
मलाः। तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम्। निदानार्थकरो रोगो रोगस्याप्युपलभ्यते। तद्यथा ज्वरसन्तापाद्रक्तपित्तमुदीर्यते॥

श्रीराम
शिवः

रक्तपित्ताज्ज्वरस्ताभ्यां शोषश्चाप्युपजायते। प्लीहाभिवृद्ध्या जठरं जठराच्छोथ एव च। अर्शोभ्यो जाठरं दुःखं गुल्मश्चाप्युपजायते। प्रति
श्यायाद्भवेत्कासः कासात्संजायते क्षयः। क्षयो रोगस्य हेतुत्वे शोषस्याप्युपजायते। ते पूर्वं केवला रोगाः पश्चाद्धेत्वर्थकारिणः। कश्चि
द्धि रोगो रोगस्य हेतुर्भूत्वा प्रशाम्यति। न प्रशाम्यति चाप्यन्यो हेत्वर्थं कुरुतेऽपि च। एवं कृच्छ्रतमा नॄणां दृश्यन्ते व्याधिसंकराः। तस्माद्य
त्नेन सद्वैद्येति षड्भिः सिद्धिमतां मतम्। ज्ञातव्यो वक्ष्यते योऽयं ज्वरादीनां विनिश्चयः। दक्षापमानसंक्रुद्धरुद्रनिःश्वाससंभवः।
ज्वरोऽष्टधा पृथग्द्वंद्वसंघातागंतुजः स्मृतः। मिथ्याहारविहाराभ्यां दोषा ह्यामाशयाश्रयाः। बहिर्निरस्य कोष्ठाग्निं ज्वरदाः स्यू रसानु
गाः। स्वेदावरोधः संतापः सर्वांगग्रहणं तथा। युगपद्यत्र रोगे तु स ज्वरो व्यपदिश्यते। श्रमोऽरतिर्विवर्णत्वं वैरस्यं नयनप्लवाः।
इच्छाद्वेषौ मुहुश्चापि शीतवातातपादिषु। जृंभांगमर्दो गुरुता रोमहर्षोऽरुचिस्तमः। अप्रहर्षश्च शीतं च भवत्युत्पत्स्यति ज्वरे।
सामान्यतो विशेषात्तु जृंभात्यर्थं समीरणात्। पित्तान्नयनयोर्दाहः कफादन्नाभिनंदनम्। वेपथुर्विषमो वेगः कंठौष्ठपरिशोषणम्।
निद्रानाशः क्षवस्तंभो गात्राणां रौक्ष्यमेव च। शिरोहृद्गात्ररुग्वक्त्रवैरस्यं बद्धविट्कता। शूलाध्मानौ जृंभणं च भवंत्यनिलजे
ज्वरे। वेगस्तीक्ष्णोऽतिसारश्च निद्राल्पत्वं तथा वमिः। कंठौष्ठमुखनासानां पाकः स्वेदश्च जायते। प्रलापो वक्त्रकटुता मूर्च्छा दाहो
मदस्तृषा। पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च। स्तैमित्यं स्तिमितो वेगः आलस्यं मधुरास्यता। शुक्लमूत्रपुरीषत्वं स्तंभस्तृप्तिरथापि च
गौरवं शीतमुत्क्लेदो रोमहर्षोऽतिनिद्रता। स्रोतोरोधो रुगल्पत्वं प्रसेको मधुरास्यता। नात्युष्णगात्रता छर्दिरंगसादोऽविपाकता।

K K S U LIBRARY
RAMTEK
441 106
M-1235
Dist Nagpur

M 1235

Accession No: 10098

नाम : क्रमिनिदान

पत्रे -10

शीर्षक - कृमिनिदान

Checked 2012

(1)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम
शिवः।

२

अतिश्वासोऽरुचिः कासः कफजोन्द्रोगश्वथुन्कता · तृष्णिका मूर्च्छाभ्रमोदाहः स्वप्ननाशः शिरोरुजा । कण्ठस्य शोषो वमथुरोमहर्षोऽरु
चिस्तमः । पर्वभेदश्च जृंभा च वातपित्तज्वराकृतिः । निमित्तं पर्वणां भेदो निद्रानाशो ज्वमेव च । शिरोग्रहः अतिश्वासः कासः स्वेदोऽप्रवर्त
नम् । संतापो मध्यवेगश्च वातश्लेष्मज्वराकृतिः । शीतत्वं स्पतातन्द्रामोहः कासोऽरुचिस्तृषा । मुहुर्दाहो मुहुः शीतं पित्तश्लेष्म
ज्वराकृतिः । क्षणेदाहः क्षणेशीतमस्थिसंधिशिरोरुजा । सस्रावे कलुषे रक्ते निर्भुग्ने वापि लोचने । सस्वनौ सरुजौ कर्णौ कण्ठः
शूकैरिवावृतः । तन्द्रा मोहः प्रलापश्च कासः श्वासोऽरुचिर्भ्रमः । परिदग्धा खरस्पर्शा जिह्वा स्रस्ताङ्गता परम् · ष्ठीवनं रक्तपित्त
स्य कफेनोन्मिश्रितस्य च · शिरसो लोठनं तृष्णा निद्रानाशो हृदि व्यथा · स्वेदमूत्रपुरीषाणां चिराद्दर्शनमल्पशः । कृशत्वं नातिगा
त्राणां प्रततं कण्ठकूजनम् · कोठानां श्यावरक्तानां मण्डलानां च दर्शनम् · मूकत्वं स्रोतसां पाको गुरुत्वमुदरस्य च । तद्वच्छीतं महा
द्दिवा जागरणं निशि । सदा वा नैव वा निद्रा महास्वेदोऽपि नैव वा · भूर्गानं स्तुननं तदेव गच्छसनम् । गीतनर्तनहास्यादिवि
कृतेहाप्रवर्तनम् · त्रिवात्याकष्टदोषाणां संनिपातज्वराकृतिः । वैरोधिकैरन्नपानैर्जीर्णाध्यशनैर्नवा । व्यामिश्रैस्तवनाद्यदि
सन्निपातः प्रकुप्यति · मरुत्स्यादिन्द्रियोत्पत्तिमरुत्स्यादुत्तरायणम् · मरुत्स्यादिन्द्रगत्कृतिः संनिपातस्य लक्षणम् · यत्र दंष्ट्रसं
कायं कण्ठरुमाश्वससोहितः । स्वाहितोस्य निश्चिनाशः स्यान्मोहश्चापि दीयते · श्लोकत्रयं वनलस्य वैरोधिकैरित्यादि · दोषे
विरुद्धैर्नष्टौ सर्वलक्षणलक्षणाः । संनिपातज्वरो ह्यसाध्यः कृच्छ्रसाध्यः ततोऽन्यथा · सप्तमे दिवसे प्राप्ते दशमे द्वादशेऽपि च · पुनर्घोरि

२

श्रीराम ·
शिवः

तरो भूत्वा प्रशमं याति हन्ति वा · सप्तमी द्विगुणा चैव दशम्येकादशी तथा · एषा त्रिदोषमर्यादा मोक्षाय च वधाय च · संनिपात
ज्वरस्यान्ते कर्णमूले सुदारुणः । शोथः संजायते तेन कश्चिदेव प्रमुच्यते · त्रयः प्रकुपिता दोषा उरःस्रोतोऽनुगामिनः । समाधि
ष्ठाय हितात्रच्छिन्द्रियमनोगताः । जनयंति महाघोरमभिन्यासं ज्वरं दृढम् । तत्स्वाङ्गे नैव चोपितिनवेष्टितां विचेष्टते ।
न च दृष्टिं भवेत्तस्य समर्था रूपदर्शने । न घ्राणे न न स्पर्शशब्दं वा जिनबुध्यते · शिरो लोडयते भीक्ष्णमाहारं नाभिनंदति · कू
जति तुद्यते चैव परिवर्तनमीहते · अल्पं प्रभाषते किंचित्तदिदं अभिन्यासादिनादिनात् · लोकाः प्रभाषितेः किंचिदभिन्यासः सउ
च्यते । प्रत्याख्यपः समाख्यो कश्चिद्दैवात् चिकित्स्यति । अभिघाताभिचाराभ्यामभिषंगाभिशापतः । आगन्तुर्जायते दोषैः
यथास्वं तं विभावयेत · श्यावास्यता विषकृते तथातीसार एव च । भक्तारुचिः पिपासा च तोदश्च सह मूर्च्छया । ओषधी
गंधजे मूर्च्छा शिरोरुग्वमथुस्तथा । कामजे चित्तविभ्रंशस्तन्द्रालस्यमभोजनम् · भयात्प्रलापः शोकाच्च भवेत्कोपाच्च वेपथुः ।
अभिचाराभिशापाभ्यां मोहस्तृष्णा च जायते · भूताभिषंगादुद्वेगो हास्यरोदनकम्पनम् । कामशोकभयाद्वायुः क्रोधात्पि
त्तं त्रयो मलाः । भूताभिषङ्गात्कुप्यंति भूतसामान्यलक्षणम् · दोषोत्थोऽहितसंभूतो ज्वरोत्सृष्टस्य वा पुनः । धातुमन्यतमं प्राप्य
करोति विषमज्वरम् · यः स्यादनियतात्कालाच्छीतोष्णाभ्यां तथैव च । वेगतश्चापि विषमो ज्वरः स विषमः स्मृतः ॥८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम।
शिवः।

३

सन्ततस्सततोऽन्येद्युस्तृतीयचतुर्थकौ। ओतोभिर्वितितादोषाञ्ज्वरो नसवाहिनि:। सर्वगात्रानुगाः सर्वेज्वरं कुर्वन्ति संततम्। एते धातु
गताः पंचकीर्तिताः विषमज्वराः। सन्ततं रसधातुस्थः सततो रक्तधातुगः। दोषकृत्यो ज्वरः प्रसत्तोऽन्येद्युः पिशिताश्रितः। मेदोगतः तृतीयेऽन्हि
अस्थिमज्जागतः पुनः। कुर्याच्चातुर्थकं घोरमन्तकं रोगसंकरम्। सप्ताहं वा दशाहं वा द्वादशाहमथापि वा। सन्तत्यायोविसर्गी स्यात्संततः सनि
गद्यते। अहोरात्रे सततकौ द्वौ कालावनुवर्तते। अन्येद्युष्कस्त्वहोरात्रे एककालं प्रवर्तते। तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः। केचि
द्भूताभिषंगोत्थं ब्रुवते विषमज्वरम्। कफपित्तात्त्रिकग्राही पृष्ठाद्वातकफात्मकः। वातपित्तात् शिरोग्राही त्रिविधः स्यात्तृतीयकः। चातुर्थ
को दर्शयति प्रभावं द्विविधं ज्वरः। जंघाभ्यां श्लैष्मिकः पूर्वं शिरस्तोऽनिलसंभवः। विषमज्वर एवान्यश्चातुर्थकविपर्ययः। अपहोऽप्यहर्ज्व
र्यातिदिनमेकं विमुंचति। यः स्यादनियतात्कालाच्छीतोष्णाभ्यां तथैव च। वेगतश्चापि विषमो ज्वरः स विषमः स्मृतः। नित्यमन्दज्वरो रू
क्षः शूनकस्तेन सीदति। स्तब्धांगः श्लेष्मभूयिष्ठो नरो वातबलासकी। जनयेन्नयनश्वावेह पीडामभुक्तस्य ता। मन्दज्वरविरूक्षश्च
शूनकस्तेन नश्यति। प्रलिम्पन्निव गात्राणि घर्मेण गौरवेण वा। मन्दज्वरविलेपी च सशीतस्यात्प्रलेपकः। विदग्धेऽन्नरसे देहे श्लै
ष्मपित्ते व्यवस्थिते। तेनार्द्धं शीतलं देहे अर्द्धं चोष्णं प्रजायते। कायेदुष्टं यदा पित्तं श्लेष्मा चान्ते व्यवस्थितः। तेनोष्णत्वं शरीरस्य
शीतत्वं हस्तपादयोः। काये श्लेष्मा यदा दुष्टः पित्तमन्ते व्यवस्थितम्। शीतत्वं तेन गात्राणामुष्णत्वं हस्तपादयोः। त्वक्स्थौ श्लेष्मानिलौ

श्रीराम:
शिवः।

तयोः प्रशान्तयोः पित्तमन्ते दाहं करोति च। कर्मोत्पादो तथा पित्तं त्वक्स्थं दाहमतीव च। तस्मिन्प्रकाशिते तीव्रे गौरवाः शीतमन्ततः। द्वावेतौ दाहशीतादिज्वरौ
संसर्गजौ स्मृतौ। दाहपूर्वस्तयोः पित्तं कृच्छ्रसाध्यतमश्च सः। तमैनाजातकफौ यस्य विहीनपित्तस्य देहिनः। आद्योऽन्यो ज्वरस्त्वस्यादिवाहीनकफस्य तु। गुरुता हृदयो
त्क्लेशः सदनं छर्द्यरोचकौ। रसस्थे तु ज्वरे लिंगं दैन्यं वास्य प्रजायते। रक्तनिष्ठीवनं दाहो मोहश्छर्दनविभ्रमौ। प्रलापः पीडका तृष्णा रक्तप्राप्ते ज्वरे
नृणाम्। पिंडिकोद्वेष्टनं तृष्णा सृष्टमूत्रपुरीषता। उष्मान्तर्दाहविक्षेपौ ग्लानिः स्यान्मांसगे ज्वरे। भृशं स्वेदस्तृषा मूर्छा प्रलापश्छर्दिरेव च। दौर्ग
न्ध्यारोचकौ ग्लानिर्मेदस्थे चासहिष्णुता। भेदोऽस्थ्नां कूजनं श्वासो विरेकश्छर्दिरेव च। विक्षेपणं च गात्राणामेतदस्थिगते ज्वरे। तमःप्रवेशं हिक्का का
सः शैत्यं वमिस्तथा। अन्तर्दाहो महाश्वासो मर्मच्छेदश्च मज्जगे। मरणं प्राप्नुयात्तत्र शुक्रस्थानगते ज्वरे। शेफसः स्तब्धता मोक्षः शुक्रस्य तु विशेषतः।
सर्वाश्रयान्तु संतत्यागातानपि। प्राकृतः समानः। मेदोऽस्थ्नः सदुःसाध्यः प्राकृतश्चापि सोऽन्यथा। वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितो ज्वरम्। कुर्यात्पि
त्तं च शरदि तस्यानुबलः कफः। तत्प्रकृत्या विसर्गाच्च तत्र नानशनाद्भयम्। कफो वसन्ते तमपि वातपित्तं भवेदनुकालं यथास्यात् सर्वेषां प्रथमेत
च्छिन्ने वा विदाने वा विपरीतोपशायिता। अन्तर्दाहोऽधिकस्तृष्णा प्रलापः श्वसनं भ्रमः। संध्यस्थिशूलमस्वेदो दोषवर्चो
विनिग्रहः। अन्तर्वेगस्य लिंगानि ज्वरस्यैतानि लक्षयेत्। संतापोऽभ्यधिको बाह्यस्तृष्णादीनां च मार्दवम्। बहिर्वेगस्य लिंगानि सुखसाध्यत्वमे
व च। लालाप्रसेको हृल्लासहृदयाशुद्ध्यरोचकाः। तन्द्रालस्याविपाकास्यवैरस्यं गुरुगात्रता। क्षुन्नाशो बहुमूत्रत्वं स्तब्धता बलवाञ्ज्वरः। आ
मज्वरस्य लिंगानि न दद्यात्तत्र भेषजम्। भेषजं ह्यामदोषस्य भूयो ज्वलयति ज्वरम्। शोधनं शमनीयं च करोति विषमज्वरम्। ज्वरवेगाधि
क्यं तृष्णा प्रलापः श्वसनं भ्रमः। मलप्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणम्। क्षुत्क्षामता लघुत्वं च गात्राणां ज्वरमार्दवम्। दोषप्रवृत्तिरु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम:
जय:।

बलवत्स्वल्पदोषेषु ज्वर: साध्योऽनुपद्रव:।हेतुभिर्बहुभिर्जातो बलिभिर्बहुलक्षण:। ज्वर: प्राणान्तकृद्यश्च शीघ्रमिन्द्रियनाशन:।ज्वरान्तेऽपि
...नस्य गंभीरो दीर्घरात्रिक:।असाध्यो बलवान्यश्च केशसीमन्तकृज्ज्वर:। गंभीरस्तु ज्वरो ज्ञेयो ह्यन्तर्दाहेन तृष्णया। आनद्धत्वेन दोषाणां श्वा
सकोशोऽद्भवेन च। आरंभाद्विषमो यस्तु यस्य दीर्घरात्रिक:। क्षीणस्य वातिकस्यास्य गंभीरोऽपि सहेतिकम्। हतप्रभेन्द्रियं क्षामं ...श्वासशीतार्तं ... ज्वरपीडितम्
...आरंभाद्विषमोऽयं स्यान्मोहे नैव च बुद्धिमान्। विसर्गं साम्यते यस्तु शोथे निपतितो दिवा। शीतार्दितोऽन्तरुष्णश्च ... ज्वरेणाभिपतेन न:। श्वा
सोऽरुचि ... विरदर्दि ... तीसानविधि ... ।।हि... दाहश्चेदस्य ज्वरस्योपद्रवा दश। मोह... मानक्लमौ हृदि संक्रान्तश्च बलवानाव
... वेगो ... ज्वरो हतिमानवमा हिध्माश्वास... ज्वरसिक्तं ... क्षीणानं ... ज्वरम्। हतप्रभेन्द्रि
यं ... क्षामं ... पीडितम्। गंभीरं तीक्ष्णवेगार्तं ज्वरितं परिवर्जयेत्। दाहश्च ... कस्मात्... संतापात् ... दोषं
... ज्वरम् ... त्रिदोषजे ज्वरे ... ज्वर... वमथु ... निरक्षरे ... दर्शनम्। स्वेदो ... त्वं ...
... ज्वरमुक्तस्य ... देहो लघुर्व्यपगत ... मोहतापपाको ... सौख्यम ... त्वम्।
स्वेद... ज्वरे ... गतोऽपि ... ज्वरमुक्तस्य ... इति ज्वरनिदानम्। अथातीसारनिदानम्। गुर्वतिस्नि
ग्ध... द्रवस्थूलातिशीतलै:। विरुद्धाध्यशनाजीर्णैर्विषमैश्चापि भोजनै:। स्नेहाद्यैरति युक्तैश्च मिथ्यायुक्तैर्विषैर्भयै:। शोकदुष्टाम्बु
मद्यातिपानै: सात्म्यविपर्ययात्। जलाभिरमणैर्वेगविघातै: कृमिदोषत:। ... वर्धितो ... संशमय्याग्निं
... वर्चो ... नाड: प्रणुन्न:। ... वातीसारं तमाहुर्व्याधिं घोरं षड्विधं तं वदन्ति। एकैकश: सर्वशश्चापि दोषै: शोकेनान्य: षष्ठ आमेन
चोक्त:।

श्रीराम:
श्रीकृष्ण:
... नाभिपादहनकुन्तितोद... सादोनिलसन्निरोध:।।१०।।विप्रक्षोभनमथाविपाकोऽभविष्यन्तस्तस्य पुन: सनाशिना।।
...निर्देहन्तमस्य ... मुह्यते ।।११।। ...मसन्नकृशं तं माननेनाभिसाध्यते।।पितातोयीलतं नीलसमाश्लीष्टे वातस्या
मूर्धो दाहपाकोपपन्नं।।१२।।श्लेष्मं सांद्रश्लेष्मणाश्लेष्मपुरं विश्वशीतं हृष्टरोमा मनुष्य:।।वा ना हन्तेहमांसांशुसहर्षं सर्वं
रूपितानाम्।।कृच्छ्रसाध्यमतीसारं विद्याद्दोषप्रकोपजम्।।१३।।शोकजं।। तैस्तैर्भावै: शोकतोऽल्पाशनस्य बाष्पोष्मा वैश्वानरमा
विश्यजं तो:।।कोष्ठं गत्वा क्षोभयत्यस्य रक्तं तच्चाधस्तात्काकणंतीप्रकाशम्।।१०।।निर्गच्छेद्वै विड्विमिश्रं ह्यविड्वा निर्गंधं वा
वातिसार:।।शोकोत्पन्नो दुश्चिकित्सोऽतिमात्रं रोगो वैद्यै: कष्ट एष: प्रदिष्ट:।।११।।अन्नाजीर्णात्प्रद्रुता: क्षोभयत: कोष्ठं दो
षाधातून्संसं धान्मलांश्च।।नाना वर्णान्नैकश: सारयंति शूलोपेतं कष्टमेनं वदन्ति।।११।।संसृष्टमेभिर्दोषैस्तु न्यस्तमप
रवंसी हिते।।पुरीषं भृशदुर्गंधि पिच्छिलं चामसंज्ञितं।।१२।।पक्वं लक्षणमाह।।एतान्येव तु लिंगानि विपरीतानि यस्य वै।।लाघ
वं यस्य ... विनिर्दिशेत्।।१३।।पक्वं जम्बवसं काकं सपर्कं पिंडैर्भिन्नं न तु।।छ... तैलघृतवसामज्जावेशवारपयोदधि।।
।।१४।।मांसधावननोपाभं पक्वं सामं कृष्णाभं।।कर्बुरंमेचकं स्निग्धं चन्द्रकोपगतं वनं।।१५।।कुणपमस्तुलुंगाभं संगंधं कपिला
तस्याहतनम: स्वासहिं शायाप... मलिनम।।संमूर्छानीतिसंमोहयुक्तं पक्वं फलाग्रं।।१६।।प्रलापयुक्तं विभिषक्पर्जे
...

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीरामः
॥५॥

असंवृतगुदं हीनं शीतं शूनातिनिपीडितम् ॥ पञ्च ॥ उष्णे हे पक्वे गतोष्माणमतीसारिणं मुत्सृजेत ॥ शोथं प्रलंबं अनंतस्मां श्वासंकास
मनोभवकम् ॥ १८ ॥ छर्दि मूर्छावहीकीरहक्कूतीसारिणमुत्सृजेत् ॥ श्वासशूलपिपासार्तं क्षीणं ज्वरनिपीडितम् ॥ १९ ॥ [illegible] विशे
षेणाननं वृद्धमतिसारो विनाशयेत् ॥ बाले वृद्धे त्वसाध्योपि पुष्टे तैर्मनुपद्रुतः ॥ श्रीपदनामसाध्यः स्याद्दिनदुष्टेषु भानुषु ॥ २० ॥
यौद्भवैः क्षितिधिपक्षान्नैनीलपीतासितारिभिः ॥ आथ तं वेगवानां पुमज्जेन्नीतोपमं त्यजेत् ॥ २१ ॥ हस्तपादौ गुदश्रीसंधिप्रपाके
मूत्रनिग्रहः ॥ पुरीषस्यातता तातीवमनतायाज्जि सारिणां ॥ २२ ॥ पिपासाश्वासनिषहात्स्यथे द्रव्या नश्यनाति पैतिके ॥ तद्गपजाय
ने तीक्ष्णानन्तामसारश्वेरा ॥ २३ ॥ प्रवाहिकमाह ॥ वायुः प्रवृद्धो निचितं बलासं नुदत्यधस्तादहिताशनस्य ॥ प्रवाहतो
ल्पं बहुशो मलाक्तं प्रवाहिकां तां प्रवदंति तज्ज्ञाः ॥ २३ ॥ प्रवाहिका वातकृता सशूला पित्तात्सदाहा सकफा कफाद्धं ॥ स
शोणिता शोणितसंभवा तु ताः स्नेहरूक्षप्रभवामतास्तु ॥ २४ ॥ तासामतीसारवदादिशेद्धि लिंगं क्रमं चामविपक्वतां च ॥ हे
बलिंगेन मतिमानसंस्तवं न लक्षयेत् ॥ २५ ॥ भुक्ते न तोष्णो त्वे वपापुनाविदि वर्ज्जितम् ॥ प्रवाहिके निततन्नलोलयान्के
नाम प्रवर्तते ॥ २६ ॥ प्रवाहति मानाम्भानि गैरति गुरु वीहः ॥ अथ पाण्डुनामपमाह ॥ यस्योधानेविनाम् अंसमा गथापुरुष गा
नि ॥ २७ ॥ दीप्ताग्नेर्हेतुकोष्ठ स्पीस्पतस्त सोऽन्नाम पः ॥ अनानितस्थानपोरुक्षेनिहानेयत्पपकृपथक् ॥ २८ ॥ तस्माज्जे

[illegible]

॥श्रीराम ४॥
॥श्रीकृस

अतिसारे निवृत्तेपि मन्दाग्नेरहिताशिनः ॥ भूयः संदूषितो वह्निर्ग्रहणीमभिदूषयेत् ॥ १ ॥ संप्राप्तिमाह ॥ एकैकशः सर्वशश्च दो
षैरत्यर्थमूर्छितैः ॥ सा दुष्टा बहुशो भुक्तमाममेव विमुंचति ॥ २ ॥ पक्वं वा सरुजं पूति मुहुर्बद्धं मुहुर्द्रवम् ॥ ग्रहणीरोगमाहुस्त
मायुर्वेदविदो जनाः ॥ ३ ॥ पूर्वरूपमाह ॥ पूर्वरूपं तु तस्येदं तृष्णालस्यं बलक्षयः ॥ विदाहोन्नस्य पाकश्च चिरात्कायस्य गौरवं
॥ ४ ॥ कटुतिक्तकषायातिरूक्षशीतात्पभोजनैः ॥ प्रमितानशनात्यध्ववेगनिग्रहमैथुनैः ॥ ५ ॥ मारुतः कुपितो वह्निं
संछाद्य कुरुते गदं ॥ तस्यान्नं पच्यते दुःखं शुक्तपाकं खरांगता ॥ ६ ॥ कंठास्यशोषः क्षुत्तृष्णा तिमिरं कर्णयोः स्वनः ॥ पा
र्श्वोरुवंक्षणग्रीवारुजोऽभीक्ष्णं विसूचिका ॥ ७ ॥ हृत्पीडा कार्श्यदौर्बल्यं वैरस्यं परिकर्तिका ॥ गृद्धिः सर्वेर
सानां च मनसः सदनं तथा ॥ ८ ॥ जीर्णे जीर्यति चाध्मानं भुक्ते स्वास्थ्यमुपैति च ॥ स वातगुल्महृद्रोगप्लीहाशंकी च मानव
ः ॥ ९ ॥ चिराद्दुःखं द्रवं शुष्कं तन्वामं शब्दफेनवत् ॥ पुनः पुनः सृजेद्वर्चः कासश्वासार्दितोऽनिलात् ॥ १० ॥ कटुजीर्ण
विदाह्यम्लक्षाराद्यैः पित्तमुल्बणं ॥ आप्लावयद्धंत्यनलं जलं तप्तमिवानलं ॥ ११ ॥ सोऽजीर्णं नीलपीताभं पीताभः सा
र्यते द्रवः ॥ पूत्यम्लोद्गारहृत्कण्ठदाहारुचितृडर्दितः ॥ १२ ॥ गुर्वतिस्निग्धशीतादिभोजनादतिभोजनात् ॥ भुक्त
मात्रस्य च भुक्तस्य कुपितः कफः ॥ १३ ॥ तस्यान्नं पच्यते दुःखं हृल्लासच्छर्द्यरोचकाः ॥ आस्योपदेहमाधुर्यकास

[illegible]

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम॥

॥६॥

ध्यमुसंतिमितं गच्छनु॥ ६ [illegible] धोमनक्षुर ८ ड गहार ४ सुहनं स्त्रीष्वहर्षतां॥ १४॥ भिन्नामषुलेष्मसंश्लिष [illegible] ष्टं गच्छ उर्ध्वं वः प्र
वर्तनेनम॥ अ दरशास्गादो र्ध्वमालसंवधकफात्मके॥ पथ्य वातादिनिर्दिष्टहेतुलिंगसमागमे॥ जितं षं निर्दिशोद् वंते षां
पथ्यानि लक्षणानि च॥ ऋ वघ्नं शितं हि गंधं शवदी वेहनं शक्त॥ आमं ब हुश्वेष्मि स्व सुशक्षमं ध वेदन॥ पथ्या न्मासा
दशाहाक्षानि सं वापि प्रमुंचति॥ अग्रकुजनमालसं हो वे संसदनं भवेत॥ दिवा प्रकोपो भवति रात्रौ शांति अगन्यपि॥ ६
र्विसे याघुर्निया नाविना कालानुबंधी नौ॥ साम वे देहामवाते न संग्रहान ग्रहणीमता॥ प्रक्लिप्त: पादयो: शूलं तथा जल
धुदी वीनि:॥ तं वदंति घटीयंत्रमसाध्यं ग्रहणीगदं॥ अतिसा न [illegible] स्पानि ष्ठानि ग्रहण्यामपि लक्षणम॥ इति ग्रहणी
संग्रहणी घटीयंत्रनिदानम॥ ॐ॥ पथ्य दोषै: समस्तैश्च श्रोणितानांस हेतो निव॥ अर्शांसि [illegible] प्रजायंते विधा
न्हं रवते त्रधे॥ पूर्वरूपमाह॥ दोषास्त्व [illegible] मांसमेदांसि संदूष्य विविधाकृतीन॥ मांसांकुरान पानादौ कुर्वन्त्यर्शांसि ते
गुद:॥ कषायकटुतिक्तानि रूक्षशीत लघूनि च॥ प्रमिताल्पाशनं तीक्ष्णं मद्यमैथुनसेवनम॥ लंघनं देशका
लौ शीतौ व्यायाम कर्म च॥ शोको वातातपस्पर्शो हेतुर्वातार्शसां मत:॥ कटम्ललवणोष्णानि व्यायामाग्न्या
तपप्रभा:॥ देशकालावशिशिरौ क्रोधमद्यमसूयनं॥ विदाहितीक्ष्णमुष्णं च [illegible] सर्व पानान्नभोजनम॥ पित्तो

श्रीराम:॥

मध्ववसिन्निक्षशीतानि लवणान्यगुरूणि च॥ अव्यायामदिवास्वप्नशय्यासनसुखे रति:॥ प्राग्वात सेवा शीतौ वदेशकौ
लार्श चिंतनं॥ श्लेष्मकानां समुद्दिष्टमेतत्कारणमर्शसाम॥ सर्वो हेतुस्त्रिदोषाणां सहजै: लक्षणौ: समं॥ विष्टंभोऽन्नस्य दौ
र्बल्यं कुक्षेराटोप एव च॥ कार्श्यमुद्गारबाहुल्यं सक्थिसादोऽल्पविट्कता॥ ग्रहणीदोषपांड्वर्ति: प्रशंका चोदरस्य च॥ पूर्व
रूपाणि निर्दिष्टान्यर्शसामभिवृद्धये॥ दोषास्त्वङ्मांसमेदांसि संदूष्य विविधाकृतीन॥ मांसांकुरानपानादौ कुर्वंत्यर्शां
सि तान्यगु:॥ गुदांकुरा बह्वनिलाः शुष्का: चिमचिमान्विता:॥ म्लाना: श्यावारुणा: स्तब्धा विशदा: परुषा: खरा:॥
मिथो विसदृशा वक्रा तीक्ष्णा विस्फुटिताननाः॥ बिंबीकर्कंधुखर्जूरकार्पासीफलसन्निभाः॥ केचित्कदंबपुष्पाभा:
केचित्सिद्धार्थसन्निभा:॥ शिर: पार्श्वांसकट्यूरुवंक्षणाभ्यधिकरुजा॥ क्षवथूद्गारविष्टंभहृद्ग्रहारोचकप्रदा:॥ का
सश्वासाग्निवैषम्यकर्णनादभ्रमावहा:॥ तैरार्तो ग्रथितं स्तोकं सशब्दं सप्रवाहिकम॥ रुक्फेनपिच्छानुगतं विबद्धमुप
वेश्यते॥ कृष्णत्वङ्नखविण्मूत्रनेत्रवक्त्रश्च जायते॥ गुल्मप्लीहोदराष्ठीलासंभवस्तत एव च॥ ८॥ अथ पित्तार्शसां लक्षणमा
माह॥ पित्तोत्तरा नीलमुखा रक्तपीतासितप्रभा:॥ तन्व्यस्राविणो विस्रास्तनवो मृदव: श्लथा:॥ १८॥ शुकजिह्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम॥
॥८॥

दाहपाकज्वरस्वेदत्रिषामूर्छानजिमोहदा॥ सा अबोदुवनीलोत्पपीतनलामवर्वसः॥ पद्मसंध्याहनीत्पीलाहानिर्द्वत्वं
गमुखवाहपः॥ २१॥ तस्यश्लेष्मोल्बनामहामल्लाधनामंद्ररुजः सिता॥ उष्णनोपविनाखि धास्तर्ध्व थत्तग्गनूस्यिनाः॥
२१॥ प्रिक्षल्यासित्तिमिताभल न्हेणा कंदूष्यासपर्शनपिप्रपाः॥ कृनीनपनसस्थाभास्तथागोस्तनसन्निभाः॥२२॥
वंक्षणानाहीनः पार्श्वे वीस्तनाभिविकासिनः॥ सस्वासकासंहल्लासप्रसेकाः स्युर्विपीनसाः॥२३॥ मेहकृच्छ्राग्नो
जाग्रशिशिरज्वनकारिणः॥ श्लेष्मापिग्निर्मार्दवंक्षुर्दराम[illegible] प्राप्य विकारदाः॥२४॥ वसामांसकफश्वापः
पुनीबासप्रवाहिकाः॥ नश्यंति निभिघनेपांडुस्निग्धत्वगारुपः॥ २५॥ अथत्रिदोषाणांमाह॥ सर्वैः सर्वाभि
कान्याक्रुंथुहरोः सहजानिन॥ नलोलवणाग्रेदकौ आः पिताकृतिसमान्विताः॥२६॥ वटप्ररोहसदृशागंजाविंदु
मसन्निभाः॥ तेसर्वदुष्टमुष्कंवर्णागाठविद्रुप्रपीडिताः॥२७॥ स्रवंति सरुसारक्तं तस्य यांतिप्रकीर्तिताः॥ भेकाभः पी ॥८०॥
घनेदुःखेः शोरितातक्षपसंभवेः॥२८॥ हीनवर्णावलोत्साहोहतौजाः कलुसेन्द्रियः॥ विटश्यावंकठिनं रुहाम
पी वापुनब्रतीते॥२९॥ तनुवाडुता वर्णविपेयिता लंवास्त्रगर्भसाम॥ कपूडुगुगुदरहसं वेहौवत्संपदिवाधिक

श्रीराम.
श्रीशिव.

श्री
प्रवाहिणी.
लेवानली. विसर्जनी

तत्रानुबंधो वातस्य हेतुर्वदिव कल्पलम। दोषाश्रितं रजेत पीतं वर्णहलिंगं गुरुमेतजम। वध्यर्तसाध्यनंवा
कृतं गुमस्याननुजाद्यजम: गुदं सलिंगंतीमितं गुरुत्वलिंगं वल्कलम. अनेष्मान वंधो मितेवसानमार्ग
सांगुर्धे:। विधं पोनस्य दोर्भल्यं कुन्देत टोपरवव। कार्श्यगुदानपा कुल्पे सा विष्य सा दोल्पाविद्रुता. गह
ती तोग पाद्य मैना वांक्ता वोदनस्यव. पंवामगानुतः पितांकल्पो गुड वजेनवे. सर्वरवप्रकुवंति गुदमानां
सगुल्फवे. तस्माद्वर्णास्तिदु: खोमिव कुल्पाजिस्नातीव. सर्वदेहोपताविनी भावे: स्पृष्टमानिव. वाल्पा
पांगुजो जातान्येक देहोल्वणानिव. सर्वाणिकुलेसाध्यानिनाविनोत्पतितानिव. दृंढ्गानिद्विती पावां
वजो वान्या न्विता निव. स्पृष्ट साध्यानिताप्याकु: पवित्संवत्सना सीव. सहजानिन्निदोवालीपानिवा
प्पंतनां वलिम: गावंते ऽर्शसिहि संस्त स्वतान्य साध्यानि निर्दिश्येत. रोवत्यो दाकुव सानिवत: पादस
मन्विते. पापंतेदीनकुपागेन: प्रस्याल्पेवान्पतोन्यया. हस्तैपादेमु खेनाम्यांगुदेल्वणसेको साध्या।

वैद्य प्राधिनो
बालपाजिवाल
दुर्लभो

श्रीराम:
श्रीशिव:
८

रोगो हस्त्याश्वरथ [illegible] स्यात् ... हस्त्यार्द्रव्य [illegible] दिनं गलपत्र [illegible] दस्यपाकरव
निहन्तु गदिनां तु नम: [illegible] मति [illegible] तरतो लोतम: [illegible] त्रिगुन्दपवंतिहि:
मेघादि [illegible] नालिमालितु: [illegible] हृतिव: [illegible]
[illegible] वहि:। [illegible] नतेनतोदपात् [illegible]
[illegible] दानवम: मन्द [illegible] विंशति [illegible]
[illegible] मानस: [illegible]
[illegible] स्वल्पाजिमेव मन्दाग्नेर्विषमाग्नेस्तु देहिन:। कदाचित्पच्यते
[illegible] दाविकृतं पच्यते: [illegible] पच्यते: तीक्ष्णाग्नि [illegible] माग्नि: [illegible]
[illegible] पच्यते: [illegible] तीक्ष्णं [illegible] तदातं [illegible] दाहस्वा
[illegible] पन्नस्य [illegible] गुरुम: [illegible]

श्रीराम

षष्ठं वा

अजीर्णे पञ्चमं केचिन्निर्देशं दिनपाकिव ८ वदंति जिर्णे प्राकृतं प्रतिकासनेम अन्नमुपानादिष
मासनाव सधान लाख प्रविपर्य पावू कालेपि सात्म्यं लघुत्वापि भूत्वा मन्नं न पाकं भजतेन
नस्य दृष्यो भयक्रोधपरिप्लुतेन लुब्धेन रुग्दैन्यनिपीडितेन प्रद्वेषयुक्तेन च सेव्यमानमन्नं
न पाकं भजते नरस्य: १।। माधुर्यमन्नं गतमामसंज्ञं विदग्धसंज्ञं गतमाम्लभावं किंचि
द्विपक्वं भृशतोदशूलं विष्टब्धमानद्धविरुद्धवातं १ तत्रामे गुरुतोत्क्लेद: शोथो गण्डाक्षि
कूटग: उद्गारश्च यथाभुक्तमविदग्ध: प्रवर्तते २ विष्टब्धे शूलमाध्मानं विविधा वातवेदना
मलवातप्रवृत्तिश्च स्तंभो मोहो ऽङ्गपीडनम् ३ विदग्धे भ्रमतृण्मूर्छा: पित्ताच्च विविधा रु
ज: उद्गारश्च साधुमाम्ल: स्वेदो दाहश्च जायते ४ न स सेवे ऽन्नं विदग्धे वो हृत्पायुगौरवं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेश
श्रीशिव

मूर्छा प्रलापो वमनं प्रसेकः सदनं भ्रमः ॥१५॥ उपद्रवा भवंत्येते मरणं वाप्यजीर्णतः ॥ स्वल्पं यदा दोषविबद्धमामं लीनं न
तेजःपथमावृणोति ॥ भवत्यजीर्णेऽपि तदा बुभुक्षा सामन्दबुद्धिं विषवन्निहन्ति ॥१६॥ ग्लानिगौरवविष्टंभभ्रममा
रुतमूढता ॥ विबंधोऽतिप्रवृत्तिर्वा सामान्याजीर्णलक्षणम् ॥१७॥ वायुः प्रसेकमनाहमूर्छादन्तप्रकोपनिव ॥ दि
तं च यत्ति सामं भवनादीन्स्वेदनानि वा ॥१८॥ शूलेनांगगुरुता वाकंपगर्भो वनानि च ॥ अनात्मवन्तः पशु
वद्भुंजते येऽप्रमाणतः ॥१९॥ रोगानिकस्य ते मूलमजीर्णं प्राप्नुवन्ति हि ॥ प्रायेणाहारवैषम्यादजीर्णं जाय
ते नृणाम् ॥२०॥ तन्मूलो रोगसंघातस्तद्विनाशाद्विनश्यति ॥ अथ विषूच्यादि[illegible] माह ॥ अजीर्णमामं विष्टब्धं
विदग्धं च यदीरितम् ॥२१॥ विषूच्यलसकौ तस्माद्भवेच्चापि विलम्बिका ॥ विषूची लक्षमाह ॥ सूचीभिरिव
गात्राणि तुदन्संतिष्ठतेऽनिलः ॥२२॥ यत्राजीर्णेन सा वैद्यैर्विषूचीति निगद्यते ॥ न तां परिमिताहारा लभन्ते वि
दितागमाः ॥२३॥ मूढास्तामजितात्मानो लभन्तेऽशनलोलुपाः ॥ विषूच्यानिदानमाह ॥ मूर्छातिसारौ वमथुः
पिपासा शूलं भ्रमोद्वेष्टनजृंभदाहाः ॥ वैवर्ण्यकंपौ हृदये रुजश्च भवन्ति तस्यां शिरसश्च भेदः ॥२४॥ अथ अलसकम
जीर्णमाह ॥ कुक्षिरानह्यतेऽत्यर्थं प्रताम्यत्परिकूजति ॥२५॥ निरुद्धो मारुतश्चैव कुक्षावुपरि धावति ॥ वातवर्चोनि

श्रीराम ॥
श्रीहरि ॥ रोधश्च यस्यात्यर्थं भवेदपि ॥२६॥ तस्यालसकमाचष्टे तृष्णोद्गारौ च यस्य तु ॥ प्रदुष्टा अलसके दोषा बाह्यस्रोतोऽतिसारवर्जि
ता ॥२६॥ कारकाः स्त्री प्रबद्धलोहैः श्रोतसां सन्निरोधकाः ॥ तिर्यग्गता वपुः कृत्स्नं दण्डवत्स्तम्भयन्ति च ॥२७॥ सद्दण्ड
लसकं तस्य शीघ्रं देहविनाशकृत ॥ दुष्टं तु भुक्तं कफमारुताभ्यां प्रवर्तते नोर्ध्वमधश्च यस्य ॥ विलम्बिकां तां भ
शदुश्चिकित्स्यामाचक्षते शास्त्रविदः पुराणाः ॥२८॥ यत्रस्थमामं विरुजत्तमेव देशं विशेषेण विकारजातैः ॥ दो
षेण येनावततं शरीरं तल्लक्षणैरामसमुद्भवैश्च ॥२९॥ यः श्यावदन्तौष्ठनखोऽल्पसंज्ञो वम्यर्दितोऽभ्यन्तरयातनेत्रः ॥
क्षामस्वरः सर्वविमुक्तसन्धिर्यायान्नरः सोऽपुनरागमाय ॥३०॥ उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथोचितः ॥ ल
घुता क्षुत्पिपासा च जीर्णाहारस्य लक्षणम् ॥३१॥ ॥ अथ अग्निमांद्याजीर्णविषूच्यलसकनिदानम् ॥ ॥ क्रिमयः
स्तु द्विधा प्रोक्ता बाह्याभ्यन्तरभेदतः ॥ बहिर्मलकफासृग्विड्जन्मभेदाच्चतुर्विधाः ॥३३॥ नामतो विंशतिविधा बा
ह्यास्तत्र मलोद्भवाः ॥ रूपमाह ॥ तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः ॥३४॥ बहुपादाश्च सूक्ष्माश्च
यूकालिक्ष्याश्च नामतः ॥ द्विधा ते कोठपिडकाः कण्डूगण्डान्प्रकुर्वते ॥३५॥ अजीर्णभोजीनमधुराम्लनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीराम०
॥१०॥ पिष्टकाडो भोक्त ॥ ध्यायामा जीर्वदिवास्वप्ना नोविरुद्ध गुरुं संलभने क्रमिरुव ॥ ३६॥ मांसमाषगुडानि दधि मृन्नैः कोष्टभवाः॥
विरुद्ध जीर्णाभाकाधैः श्रोतिताने त्थाभवंतिहि ॥ ३७॥ माषपिष्टान्नलवणगुडशाकैः पुरीषजाः ॥ ज्वरो विवर्णता शूलं हृद्रो
गंसदनं भ्रमः ॥ ३८॥ भुक्तं द्वेषोतिसारश्च संजातं कृमिलक्षणम् ॥ कफाशया सप्ता नाना: कद्रूः सर्वानि सर्वतः ॥ ३९॥ पृ
थुवध्रा निभाः केचित्कि चिगंडूपदोपमाः ॥ रूढधान्यांकुराकाराः तनुदीर्घास्तथाणवः ॥ ४०॥ श्वेताः स्ताम्रावभ
साश्च नामतः सप्तधा तु ते ॥ अत्रादा उदरावेष्टा हृदयादा महागुहाः ॥ ४१॥ चुरवो दर्भकुसुमाः सुगंधास्ते च कुर्वते ॥
हृल्लासमास्यस्रवणमविपाकमरोचकम् ॥ ४२॥ मूर्छा छर्दि ज्वरानाहकार्श्यक्षवथुपीनसान् ॥ रक्तवाहिशिरास्थाना
रक्तजाः जंतवोणवः ॥ ४३॥ अपादा वृत्तताम्राश्च सौक्ष्म्यात्केचिददर्शनाः ॥ केशादा रोमविध्वंसा रोमद्वीपा उदुम्ब
राः ॥ ४४॥ षट्ते कुष्ठैककर्माणः सहसौरसमातरः ॥ पक्वाशये पुरीषोत्था जायंते धोविसर्पिणः ॥ ४५॥ प्रवृद्धाः स्यु
र्भवेयुस्ते यदामाशयोन्मुखाः ॥ तदास्योद्गारनिःश्वासविड्गंधानुविधायिनः ॥ ४६॥ पृथुवृत्ततनुस्थूलाः श्यावाः
पीताः सितासिताः ॥ ते पंचनाम्ना कृमयः ककेरुकमकेरुकाः ॥ ४७॥ सौसुरादाः सलूनाख्या लेलिहा जनय
न्ति वा ॥ विड्भेदशूलविष्टंभकार्श्यपारुष्यपांडुताः ॥ रोमहर्षाग्निसदनं गुदकण्डूर्विमार्गगाः ॥ ४८॥ इति कृमिनिद

KKSU LIBRARY RAMTEK 441 106 M-1235 Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.10.20 13:00
,TRANSFERRED=2020/10/23 at 13:02:20
,PAGES=10
,TYPE=STD
,NAME=S0004469
,Book Name=M-1235-KRIMINIDAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection